॥ अर्धनारीश्वराष्टोत्तर शतनाम स्तोत्रम् ॥

चामुण्डिकाम्बा श्रीकन्ठः पार्वती परमेश्वरः ।
महाराज्ञीमहादेवस्सदाराध्या सदाशिवः ॥ १ ॥

शिवार्धाङ्गी शिवार्धाङ्गो भैरवी कालभैरवः ।
शक्ति त्रितय रूपाढ्या मूर्तित्रितय रूपवान् ॥ २ ॥

कामकोटिसुपीठस्था काशी क्षेत्र समाश्रयः ।
दाक्षायनी दक्षवैरी शूलिनि शूलधारकः ॥ ३ ॥

ह्रींकार पञ्जर शुकी हरिशन्कर रूपवान् ।
श्रीमद्गनेशजननी षडानन सुजन्मभूः ॥ ४ ॥

पञ्चप्रेतासनारूढा पञ्चब्रह्मस्वरूपभ्रुत् ।
चन्डमुन्डशिरश्छेत्री जलन्धर शिरोहरः ॥ ५ ॥

सिंहवाहो वृषारूढ श्यामाभा स्पटिकप्रभः ।
महिषासुर संहर्त्री गजासुरविमर्धनः ॥ ६ ॥

महाबला चलावासा महाकैलासवासभूः ।
भद्रकाली वीरभद्रो मीनाक्षी सुन्दरेश्वरः ॥ ७ ॥

भण्डासुरादि संहर्त्री दुष्टान्धक विमर्धनः ।
मधुकैटभ संहर्त्री मधुरापुरनायकः ॥ ८ ॥

कालत्रय स्वरूपाढ्या कार्यत्रयविधायकः ।
गिरिजाता गिरीशश्च वैष्णवी विष्णुवल्लभः ॥ ९ ॥

विशालाक्षी विश्वनाधः पुष्पास्त्रा विष्णुमार्गणः ।
कौसुम्भवसनोपेता व्याघ्रचर्मांबरावृतः ॥ १० ॥

मूलप्रकृतिरूपाढ्या परब्रह्मस्वरूपवान् ।
रुण्डमाला विभूषाढ्यालसद्रुद्राक्षमालिकः ॥ ११ ॥

मनोरूपेक्षु कोदण्डामहामेरु दनुर्धरः ।
चंद्रचूडा चंद्रमौलिर्महामाया महेश्वरः ॥ १२ ॥

महाकाली महाकालोदिव्यरूपादिगम्बरः ।
बिन्दुपीठ सुखासीना श्रीमदोन्कारपीठगः ॥ १३ ॥

हरिद्रा कुंकुमालिप्ता भस्मोद्धूलितविग्रहः ।

महापद्माटवीलोला महाबिल्वाटवीप्रियः ॥ १४ ॥

सुधामयी विषधरो मातङ्गीमकुटेश्वरः ।
वेदवेद्या वेदवाजीचक्रेशी विष्णुचक्रदः ॥ १५ ॥

जगन्मयी जगद्रूपोमृडाणी मृत्युनाशनः ।
रामार्चितपदाम्भोजा कृष्णपुत्रवरप्रदः ॥ १६ ॥

रमावाणीसुसंसेव्या विष्णुब्रह्मसुसेवितः ।
सूर्यचन्द्राग्निनयना तेजस्त्रयविलोचनः ॥ १७ ॥

चिदग्निकुण्डसम्भूता महालिङ्ग समुद्भवः ।
कंबुकण्ठी कालकण्ठोवज्रेशी वज्रपूजितः ॥ १८ ॥

त्रिकन्टकीत्रिभन्गीसःभस्मरक्षास्मरान्तकः ।
हयग्रीववरोद्धात्री मार्कन्डेयवरप्रदः ॥ १९ ॥

चिन्तामणि गृहावासामन्दराचलमन्दिरः ।
विन्ध्याचल कृतावासा विन्ध्यशैलार्य पूजितः ॥ २० ॥

मनोन्मनी लिङ्गरूपो जगदम्बा जगत्पिता ।
योगनिद्रा योगगम्यो भवानी भवमूर्तिमान् ॥ २१ ॥

श्रीचक्रात्मरथारूढा धरणीधरसम्स्थितः
श्रीविद्यावेद्य महिमा निगमागम सम्श्रयः ॥ २२ ॥

दशशीर्ष समायुक्ता पञ्चविंसति शीर्षवान् ।
अष्टादश भुजायुक्ता पञ्चासत्करमन्दितः ॥ २३ ॥

ब्राह्म्यादि मातृकारूपा शताष्टेकादशात्मवान् ।
स्थिरा स्थानु स्तथाबाला सद्योजात उमा मृडः ॥ २४ ॥

शिवाशिवश्च रुद्राणी रुद्रश्चैवेश्वरीश्वरः ।
कदम्बकाननावासादारुकारण्यलोलुपः ॥ २५ ॥

नवाक्षरी मनुस्तुत्या पञ्चाक्षर मनुप्रियः ।
नवावरण सम्पूज्या पञ्चायतनपूजितः ॥ २६ ॥

देहस्थषट्चक्रदेवी दहराकाशमध्यगः ।
योगिनीगनसंसेव्याभृग्वादि प्रमथावृतः ॥ २७ ॥

उग्रताराघोररूप श्शर्वाणी शर्वमूर्तिमान् ।
नागवेणी नागभूषोमन्त्रिणी मन्त्रदैवतः ॥ २८ ॥

ज्वलज्जिह्वा ज्वलन्नेत्रो दन्डनाथा दृगायुधः ।
पार्थान्जनास्त्र संदात्री पार्थपाशुपतास्त्रदः ॥ २९ ॥

पुष्पवच्चक्र ताटङ्का फनिराजसुकुण्डलः ।
बाणपुत्री वरोद्धात्री बाणासुरवरप्रदः ॥ ३० ॥

व्यालकङ्चुक सम्वीता व्यालयज्ञोपवीतवान् ।
नवलावण्यरूपाढ्या नवयौवन विग्रहः ॥ ३१ ॥

नाट्य प्रिया नाट्य मूर्ति स्त्रिसन्ध्या त्रिपुरान्तकः ।
तन्त्रोपचार सुप्रीता तन्त्रादिम विधायकः ॥ ३२ ॥

नववल्लीष्ट वरदा नववीर सुजन्मभूः ।
भ्रमरज्या वासुकिज्यो भेरुण्डा भीमपूजितः ॥ ३३ ॥

निशुंबशुंब दमनी नीचापस्मारमर्दनः ।
सहस्राम्भुजरूढा सहस्रकमलार्चितः ॥ ३४ ॥

गङ्गासहोदरी गङ्गाधरो गौरी त्र्यंबकः ।
श्रीशैल भ्रमरांबाख्या मल्लिकार्जुनपूजितः ॥ ३५ ॥

भवतापप्रशमनी भवरोगनिवारकः ।
चन्द्रमंडलमध्यास्था मुनिमानसहंसकः ॥ ३६ ॥

प्रत्यङ्गिरा प्रसन्नत्माकामेशी कामरूपवान् ।

स्वयंप्रभा स्वप्रकाशःकालरात्री कृतान्तहृत् ॥ ३७ ॥

सदान्नपूर्णा भिक्षाटोवनदुर्गा वसुप्रदः ।
सर्वचैतन्य रूपाढ्या सच्चिदानन्द विग्रहः ॥ ३८ ॥

सर्वमङ्गल रूपाढ्या सर्वकल्याणदायकः ।
राजेराजेश्वरी श्रीमद्राजराज प्रियंकरः ॥ ३९ ॥

अर्धनारीश्वरस्येदम् नाम्नामष्टोत्तरम् शतम् ।
पठन्नर्चन्सदा भक्त्या सर्व साम्राज्य माप्नुयात् ॥ ४० ॥

॥इति स्कान्दमहापुराणे अर्धनीरेएश्वर अष्टोत्तरम् ॥